www.sanskritarticle.com

ISSN NO. 2454-9177

# National Journal of Hindi & Sanskrit Research

Volume 45 (November - December, 2022)

# सम्पादकीय परिषद्


**Chief Editor**

**Dr. Mrs Raju S. Bagalkot**
Associate Professor and Research Guide
Department Of Hindi, Karnataka State
Akkamahadevi Women's University
Torvi,Vijayapura-586108

**Associate Editor**

Dr. Subash Chandra Dash
Professor & Head,
Department of Sanskrit,
Utkal University, Vanivihar,
Bhubaneswar-751004, Orissa

**Dr. Asha Rani Pandey**
Associate Professor and Chairman,
Sanskrit Department,
D.G.P.G. College, Kanpur

**Dr. Shuchita Dalal**
Professor & Head
Post Graduate Department of Sanskrit
Rashtrasant Tukdoji Maharaj Nagpur -
University, Nagpur (Maharashtra)

**Editors**

**Dr.(Smt) Sudha Gupta**
Associate Professor
Department of Sanskrit
Juhari Devi Girls P.G. College, Kanpur

**Dr.Manoranjan Senapaty**
Reader & Head,
P. G. Department of Sanskrit,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha

**Dr. Shyam Deo Mishra**
Professor & Head, Department Of Jyotish
Central Sanskrit University, Jaipur Campus,
Triveni Nagar, Near Gopalpura Bypass, Jaipur

**Dr. Saroj Gupta**
Associate Professor
Department of Sanskrit
Satyawati College(M), Delhi University, Delhi

**Dr. Richa Mehta**
Associate Professor
Head, Department of Education,
Lady Irwin College, New Delhi

**Dr.Anita Rajpal**
Associate Professor
Hindu College,
University Of Delhi, Delhi

**Dr. Satrughna Panigrahi**
Associate Professor,
Department Of Veda,
Shree Somnath Sanskrit University,
Veraval, Dist. Gir-somnath (Gujarat)

**Dr Girijaprasad Shadangi**
Associate Professor,
Dept of Samaveda,
Sri Venkateswara Vedic University,
Tirupati (Andhra Pradesh)

**Dr. Kapil Gautam**
Additional Examination Controller
Assistant Professor & Convener
Sanskrit Deptt.(Jyotish & Karmkand), Vardhman
Mahaveer Open University, Kota (Rajasthan)

**Dr. K. Tiruvengala Raghavan**
Research Officer, Regional Centre of IGNCA,
Art & Craft Village, Murungapakkam,
PUDUCHERRY – 605004.

**Dr. Mamta Gupta**
Assistant Professor Sanskrit
Government PG College,
Maihar, Satna MP

**Dr. Aditya Angiras**
Assistant Professor
Department of Sanskrit
Vishveshvaranand Vishwa Bandhu Institute of
Sanskrit and Indological Studies
Punjab University/Hoshiarpur – 146001, Punjab

**Dr.Ravi kumar Shastri**
Assistant Professor
Department of Yoga
J.J.T. University, Jhunjhunu, Raj.

**Dr. Prasad Gokhale**
Assistant Professor
Department of Vedang Jyotish
K.K.Sanskrit University,
Ramtek, Nagpur, Maharashtra.

**Dr. Dinakar Marathe**
Assistant Professor
Department of Vedang Jyotish
K.K.Sanskrit University,
Ramtek, Nagpur, Maharashtra.

**Dr. Asheesh Kumar**
Assistant Professor
Department of Sanskrit
Rajdhani College, University of Delhi, India

**Dr. Niranjan Mishra**
Assistant Professor,
Dept. of Vedabhashya,
National Sanskrit University,
Dist.-Chittoor,Tirupati, A.P.

**Dr.Jharana Rani Tripathy**
Assistant Professor,
Department of Sanskrit (FACIS),
Sri Sri University, Cuttack, Godisahi, Odisha

**Laxman Majhi**
Lecturer, P.G. Department Of Sanskrit,
Utkal University Campus,
Vani Vihar, Bhubaneswar

# INDEX – Volume 45 (November - December, 2022)

National Journal of Hindi & Sanskrit Research


| S. No. | Title & Author | Page No. |
|---|---|---|
| 1 | विषादलहरीकविहृदयपरिस्पन्दः<br>डॉ. सीहेच्. नागराजु | 01-04 |
| 2 | वेदान्तेषु विशिष्टाद्वैतवेदान्तस्य विशेषत्वम्<br>सावाना खातुन् | 05-08 |
| 3 | सुप्तिङ्प्रत्ययेषु अनुबन्धानां प्रयोगविचारः<br>Priya P.R | 09-11 |
| 4 | वर्तमानपरिप्रेक्षे किरातार्जुनीयमहाकाव्यस्य सामाजिकतत्त्वानां प्रासङ्गिकता<br>स्वप्ना पाञ्जा | 12-15 |
| 5 | जैनदर्शनस्य तत्त्वमीमांसायां प्रयोजनभूतत्वम्<br>ऋषभ जैनः | 16-19 |
| 6 | साङ्ख्ययोगयोः मनसः विवेचनम्<br>विजयकुमारझा | 20-22 |
| 7 | पाणिनीयकाशकृत्स्नयोः तद्धातुपाठयोश्च पौर्वपर्यविचारः<br>कोङ्क कुमारस्वामि | 23-26 |
| 8 | Role Of Thinking Style In Concept Formation<br>Arunima | 27-32 |
| 9 | संस्कृत शिक्षा की आवश्यकता, समस्या एवं समाधान<br>कालीशंकर मिश्र | 33-36 |
| 10 | इतिहासकाव्येषु सालुवाभ्युदयस्य वैशिष्ट्यम्, तत्रत्यऋतुवर्णनश्च<br>सूरे रामतिरुमलरेड्डिः | 37-39 |
| 11 | वैदिकवाङ्मये औषधविज्ञानस्य अभ्युदयः<br>सोनाली सैनी | 40-44 |
| 12 | Nālukettu – A Traditional Architectural Form Of Kerala<br>Dr. S. Radhakrishnan | 45-48 |
| 13 | Interpretation of Karma-Yoga as per Gita in contemporary times<br>Kumari Sukriti | 49-52 |
| 14 | मध्यकालीननाट्यसाहित्ये रुद्रदेवस्य वैशिष्टयम्<br>इन्दु | 53-57 |
| 15 | कालिदासकृतिषु मन्त्रिपरिषद् व्यवस्था<br>नरेन्द्रकुमारसैनी | 58-61 |
| 16 | भोजराजस्य सरस्वतीकण्ठाभरणे नूतनसंज्ञाविवरणम्<br>मिनती दे | 62-66 |

## INDEX – Volume 45 (November - December, 2022)

National Journal of Hindi & Sanskrit Research


| | | |
|---|---|---|
| 17 | सिद्धान्तकौमुदीरीत्या पणिनीयगत्यर्थकात्मनेपदी धातूनां विवृतिः<br>दीप्तिमयी षड़ङ्गी | 67-69 |
| 18 | नवरात्रोत्सवस्य सांस्कारिकगतयः स्वाधीनश्च<br>Sheeja.S | 70-71 |
| 19 | मध्य कालीन साहित्य का पुनर्पाठ और जाम्भाणी साहित्य<br>डॉ. नन्दनी समाधिया | 72-75 |
| 20 | Scientific Significance of Candana (Santalam album) plant – Indian perspective<br>Dr Ishwara Prasad A | 76-78 |
| 21 | वेदाङ्गभूतस्य ज्योतिंशशास्त्रस्य वेदाङ्गत्वसमर्थनम्<br>डॉ. के. तारकरामकुमारशर्मा | 79-82 |
| 22 | वैय्याकरणानां मते लकारार्थ विवेचनम्<br>शिवम कुमार उपाध्याय | 83-85 |
| 23 | विहगेन्द्रसंहितायां प्राणायामविधिः<br>A. Mahesh | 86-88 |
| 24 | आर्ष ग्रन्थों में राष्ट्रभावना<br>Dr Girijaprasad Shadangi | 89-91 |
| 25 | प्राचीन कृषिकेन्द्रित राज्य व्यवस्था<br>Dr. Vrushali Bhosale | 92-94 |
| 26 | उपनिषदां महत्त्वम् एवं संख्याविचारः<br>Dr. Prasanna Kumar Aithal | 95-97 |
| 27 | Jayadeva: The poet and His popularity<br>Deviprasad Mishra | 98-103 |
| 28 | खण्डकाव्यलक्षणविमर्शः<br>Dr. Sayanto Mahato | 104-108 |
| 29 | Cow Mahatmayam In The Vedas<br>Gajula Jeevan Kumar | 109-112 |
| 30 | “महाकवि भास के रूपकों की सामाजिक स्थिति”<br>डॉ. धानी जामोद | 113-115 |
| 31 | उपनिषत्सु उपमालङ्कारः<br>डॉ. प्रसन्नकुमार ऐताळ | 116-119 |
| 32 | किरातार्जुनीये निहितानि राजनैतिकतत्त्वानि<br>सलिलकान्तः त्रिपाठी | 120-123 |

# INDEX – Volume 45 (November - December, 2022)

National Journal of Hindi & Sanskrit Research


| | | |
|---|---|---|
| 33 | दाम्पत्यजीवने विवाहविचारः<br>श्री. सौम्यरञ्जनमहापात्रः | 124-125 |
| 34 | India's Ancient Town Planning – A whopping Ecological Balance<br>Dr. Prasanna Kumar Aithal | 126-127 |
| 35 | मालविकाग्निमित्रनाटके शिक्षाक्रमः<br>डॉ. ए. सच्चिदानन्दमूर्त्तिः | 128-129 |
| 36 | Vedic Literature And Agriculture<br>Dr. Prasanna Kumar Aithal | 130-133 |
| 37 | तर्कसङ्ग्रहचन्द्रिकाव्याख्याकार मुकुन्दभट्टमते हेत्वाभासस्वरुपम्<br>गणेश्वर नायक | 134-135 |
| 38 | अर्थव्यञ्जकता<br>डा.वि.सूर्यप्रभा | 136-139 |
| 39 | भारतीयसंस्कृतेः मूलाधारः – संस्कृतम्<br>Dr. Mallika | 140-142 |
| 40 | विनियोगविधिसहकारिणः स्थानप्रमाणस्य स्वरूपविवेकः<br>डा. नागराजभट्टः | 143-144 |
| 41 | संस्कृतशास्त्रशिक्षणे प्रभावयतां मनोवैज्ञानिककारकाणि<br>Dipanwita Das | 145-147 |
| 42 | कुमारसंम्भवमहाकाव्ये वैवाहिकव्यवस्था- एकम् विश्लेषणम्<br>सरोज महानन्दः | 148-150 |
| 43 | रांगेय राघव का व्यक्तित्व और उनके साहित्यिक अवदान का मूल्यांकन<br>डॉ. सुरेन्द्र कुमार | 151-156 |

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022 1(45): 148-150
© 2022 NJHSR
www.sanskritarticle.com

सरोज महानन्दः
शोधार्थी,स्नातकोत्तरसंस्कृतविभागः,
उत्कलविश्वविद्यालयः,भुवनेश्वर,
ओडिशा

# कुमारसंम्भवमहाकाव्ये वैवाहिकव्यवस्था- एकम् विश्लेषणम्

**सरोज महानन्दः**

**उपक्रमः**

भारतीयधर्मशास्त्रानुसारेण प्रमुखषोडशसंस्कारेषु विवाहसंस्कारः अन्यतमश्रेष्ठसंस्कारः । विवाह् घञ् वि उपसर्ग वह् धातोः घञ् प्रत्यययोगे विवाहशब्दो निष्पद्यते। धर्मार्थकाममोक्षार्थं विवाहकरणीयः। केषाञ्चिदाचार्याणां मते पुत्रकामार्थं विवाहः क्रियते। पूर्वापरसर्वाधिकम् एकविंशति २१ पुरुषान् उद्धरति पुत्रः। वरकन्ययोः वैवाहिकजीवने सुखसमृद्धिः, सुपुत्रपुत्री, यशम्, धनम्, सम्मानायुबृद्ध्यादि करणीय विवाहसंस्कारकार्यं क्रियते ।

विवाहः एक जीवनस्य आधारशिला यस्मिन् सम्पूर्णं गृहम् अवलम्बते। यदा एषा वैवाहिकशीलाभग्नं भवति तदा समग्रजीवनं दुर्विसह् भवति । वैदिककालात् गृहस्थाश्रमस्य पवित्रकार्यं सम्पादनाय विवाहः आवश्यकः इति मन्यते। संस्काराणां मध्ये विवाहोऽप्येको यज्ञ एव मन्यते। अत एव विवाहं संपाद्य गृहस्थजीवने प्रवेश आवश्यको मन्यते। तद्भावे मानवोऽयज्ञियो यज्ञहीनो वाऽभिधीयते। तैत्तिरीयब्रह्मणे स्पष्टतया लिखितम् यथा- अयज्ञियो वा एष योऽपत्नीकः।[१]

**कुमारसम्भवमहाकाव्ये विवाहव्यवस्था-**

महाकविकालिदासप्रणीतः कुमारसम्भवमहाकाव्ये विवाहस्य उद्देश्यं वैशिष्ट्यं च वर्णितमस्ति। सन्तानप्राप्तये उत्तराधिकारीनिशित्य भौतिकोन्नतिः तथा व्यक्तित्वस्य विकाशाय विवाहः अपरिहार्य वर्तते। भगवतः शङ्करमुखेन महाकविः कालिदासः उक्तं यत्- अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।[२] संसारेऽस्मिन् प्रत्येकं पिता स्वकन्यायै विवाहनिमित्तं चिन्तां करोति। यतः कन्या परकीय धनमिति कथ्यते। ३ संसारे मातृपितृणां चिन्ताऽस्ति यत् तेषां पुत्री विवाहयोग्या अस्ति वा इति। अतः यदा उपयुक्तं वरं लभ्यते तदा बालिकायाः पिता निश्चिन्तः भवति। एतदेव कारणं यदा पर्वतराजः हिमालयस्य कन्या पार्वत्याः विवाहः शिवेन साकं भवतीति देवर्षिनारदः पूर्वानुमानं कृतं तदासः चिन्तामुक्तः अभवत्।[४]

महाकविकालिदासेन कुमारसंभवमहाकाव्ये पार्वतीपरमेश्वरस्य विवाहवर्णनावसरे विविधः विवाह-विधिः उपस्थाप्यते। यथा - १.वाग्दानम्, २.विवाहदिननिरुपणम् ३.वैवाहिकस्थानम् ४. वस्त्रपरिधानम् ५.मण्डपप्रवेशः ६.वरयात्रा ७.मधुपर्कपूजनम् ८.समञ्जनम् ९.पाणिग्रहणम् १०.अग्निपरिक्रमणम् ११.सूर्यदर्शनम् १२.वध्वाशीर्वादः १३.त्रिरात्रवत् च।

**१. वाग्दानम्-**

कुमारसम्भवमहाकाव्ये भगवतः शङ्करः पार्वत्याः तपस्यायां मुग्धो बभूवा । अतः परमेश्वरः शिवः पार्वतीपरिणेतुकामः सप्तऋषिभिः सह अरुन्धती हिमालयं प्रेषितवान्। यतोहि कन्यायाचनार्थं सतां द्वारा प्रयतितव्यंयेन च सप्रयतः सफलः भवति। तदुच्यते- विक्रियायै नकल्पन्ते सम्बन्धाः सदनुष्ठिताः इति। अनेन वाग्दानविधौ कालिदासः स्वदृष्टिं कथं व्यापारचयति इति वयं ज्ञातुं प्रभवामः। परमेश्वरस्य प्रतिनिधिभूतं सप्तर्षिमण्डलं हिमालयं प्राप्य पार्वतीपितरं प्रति शिवस्य परिणिनीषां प्रकटयति स्म। यथा-

**तमर्थमिव भारत्या सुतया योक्तुमर्हसि।**

Correspondence:
सरोज महानन्दः
शोधार्थी,स्नातकोत्तरसंस्कृतविभागः,
उत्कलविश्वविद्यालयः,भुवनेश्वर,
ओडिशा

**अशोच्या हि पितुः कन्या सद्भर्तुप्रतिपादिता ।।**[६]

अत्रेदं व्यक्तव्यं उक्तश्लोके कालिदासः स्वस्य स्वतन्त्रमहिमानं प्रकाशयति। यथा भारत्याः अर्थस्य च यथा नित्यसंयोगः वर्तते तथा पार्वत्याः परमेश्वरस्य च नित्य सम्बन्धः अस्ति इति द्योतयति। एतावता वाग्दानविधिः कालिदासेन कुमारसम्भवे पार्वतीपरिणयावसरे वर्णितः।

**२. वैवाहिकस्थानं वस्त्रपरिधानं च -**

विवाहकाले स्थानः तथा वस्त्रपरिधानस्य वैशिष्ट्यं कविकालिदासः कुमारसम्भवमहाकाव्ये स्पष्टतया प्रतिपादितम्। शास्त्रानुसारेण पार्वतीविषयेऽये कालिदासेन एष शुभोत्सवः चर्चितः। यथा -

**अङ्कादयावङ्गमुदीरिताशीः सा मण्डिता मण्डनमन्वभूङ्क्त।**
**सम्बन्धिभिन्नोऽपिशिरोः कुलस्य स्नेहस्ते वाकायतनं जगाम।।**[६]

अत्र कालिदासः एवम् उपविशति यत् सर्वेऽपि कुटुम्बनिः स्वकन्यामिव अभिलाषयां कामपि कन्यां विवाहयोग्या पुरस्कृत्य विवाहकर्मणि एकाग्रचित्ताः सन्तः सम्पादयेत् इति। इयं खलु मामाजिकममदर्शनभावना कालिदासीया इति अस्माभिः प्रत्योवव्यम्। अस्येम अथ च तथैव अस्माभिरपि सर्वदा सर्वत्र अनुष्ठेयम्। तदनन्तरं माङ्गलिकप्रासाधन्यैः कृतं माङ्गलिककर्म पार्वत्याः विपये तदीयाभिः स्त्रीभिः कथम् अनुष्ठितमिति स्पष्टमभिहितम्। अत्र पति पुत्रवत्याः स्त्रियः इति कथनेन माङ्गलिककर्मणि वैवाहिकसंस्कारे तासामेव अधिकारः शास्त्रानुगतः। एवं निर्णाति कौशेयं इति कथनेन माङ्गलिककर्मणि कौशयेवस्त्रपरिधानमवश्यं कार्यम् इति कालिदासः अस्मानुपदिशति। एवं तमलङ्कारयित्वा वन्धुजनाः तान् गृहं प्रति नयन्ति स्म । तत्र स्नानगृहैः वन्धुजनैः रत्नैः अलङ्कृतान् जलपूर्णान् घटान् आनीय मङ्गलवादैः सह पार्वती स्नापयन्ति स्म ।[७]

**३. वरयात्रा-**

वरयात्राविधानं वरपक्षे प्रशस्तं भवतीति। प्रस्थानावसरे शुभमूर्हूर्तादिकं परामृश्य शुभावसरे वरः स्वस्य मित्रैः वान्धवैः च मह यथोचितं यानं आरुह्य दध्वाः गृहाभिमुखं प्रस्थानं करोति।[८] कन्यागृहं वरः गत्वा पूर्वाभिमुखाः तिष्ठति। वरयात्रायाः उल्लेखः वैदिकग्रन्थेपु प्राप्यते। शाङ्खायन-आश्वालयनादिपु गृह्यसूत्रेपु अपि अस्य वर्णनं परिलक्ष्यते। एतन्मतानुसारं रथः, गजः, तथा अश्वः वरस्य वाहनं भवितुं शक्यते।

महादेवशिवस्य पाणिग्रहणस्यानुरुपं प्रसाधनं मातृभिः सम्पादितम्। तदनन्तरं सप्तर्पयः पौरहित्ये नन्दिभुजावलम्वनः सन् व्याघ्रचर्मणान्तरितमाच्छादितं वृपभपृष्ठः आरुह्य सः देवो तेन सह मुर्शाभितवरयात्रि समारब्धः। स्व स्वः आरोहणं कृत्वा सप्तमातरो अपि तमनुव्रजन्ति स्म स्वपर्ति। तामां मातृणां पश्चात् श्वेतकपालङ्कारेण सज्जिता महाकालीदेवी च अनुव्रजति स्म।[९] तत्पश्चात् शिवस्य पुरोगच्छभिः प्रमथैः गतैः मङ्गलवाद्यध्वनिः उत्पर्जितः। मङ्गलवाद्यस्य ध्वनिः श्रुत्वा देवगणो अपि तत्रागतः।[१०] देवेन्द्रादयः परमेश्वरस्य विवाहं द्रष्टुमागता तान्सर्वान नद्रिः एकैकस्य नामोच्चारणपूर्वकं शिवस्य पार्श्वे नीतवान्। तदा सर्वेऽपि परमेश्वरं प्रणामं चक्रुः इति कविः आह-

**तं लोकपालाः पुरुहूतमुरव्याः श्रीलक्षणोत्स्त्रर्गादिनीतवेषाः।**
**दृष्ट प्रदाने कृत नन्दिसंज्ञास्तत्विर्शताः प्राञ्जलयः प्रणेमुः।।**[११]

यदा व्रह्म, विष्णु, इन्द्रादिन्सर्वानतिथीन् परमेश्वरः प्रणम्य तेभ्यः सर्वेभ्यः स्वागतं व्याजहार।[१२] विवाहेऽस्मिन् सप्तर्षयः ऋत्विग्रूपेण शिवेन कृताः तदिदमाह -

**तस्मै तयाशीः ससृजेपुरस्तास्तप्तिर्षभिस्तानिस्वतपूर्वमाह।**
**विवाहयज्ञे वितते अत्र यूयमध्वर्यवः पूर्वकृता मयेति।।**[१३]

गन्धर्वगणः देवगायकाः विश्वावसुप्रमुखः भगवतः शिवस्य त्रिपुरासुरवधवृत्तान्तम् अन्यदपि शिवस्य प्रशस्तं चरित्रं संगीतरुपेण गायति स्म। गन्धर्वः शिवमनवर्तमानः हिमालयं प्रतिजगाम।[१४] भगवतः शिवस्य वाहनरुपः वृषभः भगवन्तं शिवं ऋतिवावधं हिमालयं प्रति जगाम इति कविः वर्णयति यथा-

**खे खेलगामी तमुवाह वाहः सशब्दगामीकरकिङ्किणीकः।**
**जटाभिघातादिव लग्नपङ्के ध्वन्वन्मुहुःप्रातघनेविषाणे।।**[१५]

स च वृषभः अतीव वेगेन हिमालयं प्राप्तः यश्च हिमालयः अन्येषामेवं दुष्प्राप्यः इति कविः प्रस्तौति।[१६]

**४. वरस्य मधुपर्कपूजनम्-**

श्वशुरेण वरंप्रति यत् सत्कारं क्रियते तत् मधुपर्कमिति। महादेवशिवः श्वशुर-गृहे प्रवेशानन्तरं सः विष्टरे उपविशति स्म। तदनन्तरं सः यथाविधिं समग्रेण रत्नमर्घे मधुमहगव्य नवदूकूलं च श्वशुरेण हिमालयेन दत्त प्रत्यग्रहीत्। यथा-

**तत्रेश्वरो विष्टरभाग्यथावत्सरत्नमर्घं मधुमच्च गव्यम्।**
**नवे दुकूले नगोपनीतं प्रत्यग्रहीतत्सर्वमन्त्रवर्जम्।।**[१७]

**५. समञ्जनम्-**

मधुपर्कपूजनं नवदुकूलपरिधानन्तरं परस्परं समञ्जोयाम् इति कन्यापिता एनैवधूवरौ समञ्जयति। समञ्जनं नाम सम्मुखीकरणम्। कालिदासानुसारं महेश्वरस्य मधुपर्कपूजनं तथा नवदूकूलपरिधानानन्तरं शिवः हिमालयस्य कुशलभिः स्त्रीभिः पार्वती समीपं नीतः।[१८] सम्मुम्वीभूतयोः तयोः वधूवरयोः नेत्रयुगलयोः लज्जया नियन्त्रणमकुरुताम्।

**६. पाणिग्रहणम्-**

सर्वेपु विधिपु पाणिग्रहणविधिः गुरुत्वपूर्णमेव। कुमारसम्भवे शिवपार्वत्योः विवाहावसरे हिमालयस्य पुरोहितेन उपयुक्तमन्त्रैः देव्याः पार्वत्याः करं शिवो जग्राह।[१९]

**७. सूर्यदर्शनम् तथा ध्रुवदर्शनम्-**

लाजाहोमादनन्तरं सूर्यदर्शनं तथा चन्द्रदर्शनं च भवति। पार्वतीपरमेश्वर्योः लाजहोमदनन्तरं पुरोधास्तु पार्वती भर्ता सह धर्माचर्यां कर्तुमादिदेश।[२०] तदनन्तरं शिवः पार्वती ध्रुवदर्शनाय प्रयोजितवान्। यदा शिवःपार्वती ध्रुवदर्शनाय अवदत् तस्तमये अत्यन्तलज्जशीला सा पार्वती आनन्दमुन्नमयी हास्वरेण दृष्टवतीति भवति।[२१]

**८. वध्वाशीर्वादः-**

साधारणतः विवाहसंस्कारस्य समापनादनन्तरं वरवध्वौ गुरुजनेभ्यः आशीर्वादं नयन्ति अर्थात् विवाहक्रियायामित्वं समाप्तायां गुरुणामाशीर्वादो वरवधूभ्यां प्रायुज्यते। तदनुसारेण उमापरमेश्वरयोः विवाहक्रियासमापनादनन्तरं तौ अपि गुरुजनानाम् आशीर्वादं गृहीतवन्तौ। प्रथमतः तौ यज्ञासनोपविष्टाय पितामहाय नमस्कारं कृतवन्तौ।[२२] प्रजापतिः ब्रह्माअपितांवधूंपार्वतीवीरप्रस-वाभवइतिप्रतिनिघ्नतेस्म। यथा-**वधूर्विधात्राप्रतिनिघ्नतेस्म कल्याणि।**[२३] **वीरप्रसवाभवेति।**[२४] गुरुजनेभ्यः नमस्कारादनन्तरंतौ जायापती वलुप्तांरचितां चतुरस्त्रवेदीम्आगच्छतःस्म। तत्तौ कनकसिंहासनमध्ये उपविशतःस्म तत्पश्चात् जनाः तयोरुपर्यार्द्रक्षिणारोपणं कृतवन्तः। तयोः मनोरञ्जनाय नाटयाभिनयो अस्माभिः प्रादिर्श।

**उपसंहारः-**

सुस्थ वैवाहिकजीवनस्य प्रतिपादनाय कविकुलगुरुः विश्ववन्दनीयः महाकविकालिदासस्य कुमारसम्भवमहाकाव्यं मूर्धन्यभूतमस्ति। समाजस्य सङ्गठनाय स्वस्थपरिवेशनिर्माणाय तथा समाजे मानविकमूल्यबोधजागरणाय, कुमारसम्भवमहाकाव्ये महाकवि-कालिदासः विवाहसंस्कारस्य कृते पार्वतीपरमेश्वरयोः विवाह-प्रसङ्गे यानि यानि नियमानि प्रतिपाद्यन्ते ते नियमाः समग्रमानवसमाजस्य कृते अचिरं स्वागतयोग्याः वर्तन्ते। साम्प्रतं पयोभ्रष्टः मानवस्य परिवर्धनाय तस्य गठनाय च कुमारसम्भव-महाकाव्ये विविधाः नियमाः यथा- वाग्दानम्, विवाहदिनिरुपणम्, वैवाहिकस्थानम्, वस्त्रपरिधानं च कन्यायाः मण्डपप्रवेशविधिः, वरयात्रा, पाणिग्रहणम्, सूर्यदर्शनम्, तथा ध्रुवदर्शनम्, वध्वाशीर्वादः एते व्यवस्थाः महामन्त्रौषधिः सदृशं वैवाहिकजीवने शृङ्खलां दास्यन्ति इति नास्तिकोऽत्र संशयः।

**पादटिप्पणी-**

१. तै.ब्र.२.२.२.१३
२. कु.सं.६.२८
३. अर्थोहि कन्या परकीय एव।- अभि.शा.४
४. कु.सं.१.५०-५१
५. कु.सं.६.७९
६. कु.सं.७.५
७. पिन्यस्त वैदुर्यशिलातलेऽस्मिनावध्यमुक्ताफलभक्ति चित्रे।
आवर्जिताष्टापद कुम्भतोयैः ततुर्यूमेनां स्नपयान् वभूवुः।।
कु.सं.७.११
८. कृतकौतुकवन्धश्च मित्रवान्धवसंयुतः।
यानं यथार्थमारुह्य यातव्यश्च वधूगृहम्।। कु.सं.७.३८
९. तंमातरे देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंमाः।।
- कु.सं.७.३९
तासां च पश्चात्कनकप्रभाणां कालीकपालाभरणा चकासे।।
-कु.सं.७.४०
१०. ततोगणैः शूलभृतःपुरोगैःउदीरितो मङ्गलतुर्यघोषः।
विमानशृङ्गाण्यवगाहमानः शशंससेवावसरं सुरेभ्यः।।
- कु.सं.७.४५
११. कु.सं.७.४६
१२. कु.सं.७.४७
१३. कम्पेनमूर्ध्नः शतपत्रयोनिं वाचाहरिं वृत्रहणं स्मितेन।
आलोकमात्रेण सुरानशेषास्मम्भवयामास यथा प्रधानम्।।
कु.सं.७.४८
१४. कु.सं.७.४९
१५. विश्वावसुप्राग्रहरैःप्रवीणैः सङ्गीयमानत्रिपुरावदानः।
अधानमध्यान्तकारलङ्कारध्वस्तार ताराधिपरदण्डधारी।।
- कु.सं.७.५०
१६. कु.सं.७.७२
१७. स प्रापदप्राप्तपराभियोगं नगेन्द्रभुक्तंनगरंमुहुर्तात्।
पुरोविलग्नैर्हरदृष्टिपातैःसुवर्णसूत्रैरिवकृष्यमाणम्।।
- कु.सं.७.७३
१८. कु.सं.७.७६
१९. दुकूलवासाः स वधूसमीपं निन्ये विनित्यैरवरोधदक्षैः।।
-कु.सं.७.७९
२०. तयोःसमापभिषु कातराणि किंचिद्व्यवस्थापितसंहृतानि।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यकानि विलोचनानि।
- कु.सं.७.८३
२१. वध्वंद्विजःप्राहवेष वस्तेवह्निर्विवाहंप्रतिकर्मसाक्षी।
शिवेनभत्रा सह धर्मचर्याकाया त्वा मुक्तिविचारयेति।।
- कु.सं.७.८५
२२. ध्रुवेणभत्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्टा इत्यानन्दमुन्नमर्य ह्यसन्नकण्ठी कथमप्युवाच।।
- कु.सं.७.८६
२३. इत्थंविधिज्ञेनपुरोहितेन प्रयुक्तपाणिग्रहणेपचारैः।
प्रणेमत्वस्तौपितरौप्रजानां प्रज्ञासनस्थाय पितामहाय।।
- कु.सं.७.८७
२४. वलुप्तोपचारं चरुरस्त्रवेदीं तावेत्य पश्चात्कनकासनस्थौ।
जायापती लौकिकमेपतणीयमार्द्राक्षतारोपणमवन्नभूताम्।।
- कु.सं.७.८८
अपश्यतामस्परसां मुहुर्तप्रयोगमाघं कलिताङ्गहारम्।।
- कु.सं.७.९१